# संस्कृतवार्ता

दिनाङ्क :-27.10.2024

प्रात: - 06:55

**मन की बात-कार्यक्रम:**

प्रधानमन्त्री नरेन्द्रमोदी अद्य स्वीये "मन की बात" इत्यस्मिन् कार्यक्रमे देशवासिभि: साकं विचार-विनिमयं करिष्यति। "मन की बात" इति मासिक-कार्यक्रमस्य इदं पञ्चदशाधिक एकशतं संस्करणं भविष्यति। अस्य कार्यक्रमस्य प्रसारणम् आकाशवाण्या: दूरदर्शनस्य च सर्वाभि: वाहिनिभि: प्रसारयिष्यते। अयं कार्यक्रम: आकाशवाणी-दूरदर्शनम्-प्रधानमन्त्री-कार्यालय-सूचनाप्रसारण-मन्त्रालय-इत्येतेषां यूट्यूब-वाहिनीष्वपि श्रोतुं द्रष्टुं वा शक्यते इति। प्रधानमन्त्रिण: सम्बोधनानन्तरम् अनुक्षण अयं कार्यक्रम: क्षेत्रीय-भाषास्वपि श्रोतुं शक्यते। क्षेत्रीय-भाषासु अस्य पुन: प्रसारणं रात्रौ अष्टवादने भविता।

**अमितशाह - भू-पत्तनम्**

केन्द्रीयगृहमन्त्री अमितशाह: अद्य पश्चिमबङ्गस्य भारत-बाङ्गलादेशयो:-सीम्नि स्थिते पेट्रापोल-इत्यत्र लैन्ड-पत्तने नवनिर्मितस्य यात्री-भवनस्य,कार्गो गेट इति 'मैत्री-द्वारस्य च उद्घाटनं करिष्यति। अस्य भवनस्य उद्देश्यं भारत बाङ्गलादेशयो: नागरिकानां कृते अन्तर्राष्ट्रीयव्यापारे, पारागमने च सौविध्य प्रदानम् अस्ति। उत्तर २४ परगनामण्डले स्थितं पेट्रापोल् भूपत्तनं दक्षिण एशियाया: बृहत्तमं स्थलपत्तनम् अस्ति तथा च द्वयो: देशयो: व्यापार-वाणिज्ययो: च कृते महत्त्वपूर्णद्वाररूपेण कार्यं करोति। पेट्रापोल्-बेनापोल्-पारगमनं महत्त्वपूर्णेषु स्थलसीमक्षेत्रेषु अन्यतमम् अस्ति। पेट्रापोल भारतस्य अष्टमं बृहत्तमं अन्तर्राष्ट्रीयं आप्रवासनपत्तनं अपि अस्ति, यत् प्रतिवर्षं द्वि दशमलव पञ्चत्रिंशत् लक्षं यावत् यात्रिणां आवागमनस्य सौविध्यं प्रदास्यति ।

**भाजपा सूची :**

भारतीय जनता पार्टीति दलेन महाराष्ट्रविधानसभानिर्वाचनार्थं द्वाविंशति: प्रत्याशिनां द्वितीयनामावली प्रकाशिता। दलेन देवयानी सुहास् फारण्डे इत्यसै नासिक सेण्ट्रल् इत्यासनात् । डॉ. मिलिन्द रामजी नरोते गडचिरोली आसनात् , चैनसुख मदनलाल सञ्चेति मलकापुर विधानसभासनात् नैर्वाचनिक समरांगणे अवतारित:।

**स्पेन-राष्ट्रपति:**

स्पेनदेशस्य राष्ट्रपति: पेड्रो-सांचेज-इत्यसौ अद्य आरभ्य अस्य मासस्य नवविंशतिदिनांकं यावत् भारतस्य आधिकारिकयात्रायाम् अस्ति। तेन सह तस्य भार्या बेगोना-गोमेज-इत्यसौ च आगच्छति। विदेश-मन्त्रालयेन एकस्मिन् प्रदत्ते वक्तव्ये कथितं यत् श्रीसांचेजस्य इयं प्रथमा भारतयात्रा भविष्यति। इत: पूर्वं प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रपति: सांचेज: च बहुपक्षीयोपवेशनेषु अनेकवारं मिलितवन्तौ।

यात्राप्रवासे राष्ट्रपतिः सांचेजः प्रधानमन्त्रिणा श्रीमोदिना साकं मण्डलस्तरीयां वार्तां समाचरिष्यति। उभौ नेतारौ वडोदरायां सी-पञ्चनवत्यधिक-द्विशतं इत्याख्यस्य विमानस्य स्थापित संयंत्रस्य उद्घाटनं विधास्यतः। एतद्धि विमानन क्षेत्रे मेक इन इण्डिया इत्यस्य उपक्रमस्य अन्तर्गतं भारतेन विहितः प्रमुखः पदक्षेपो वर्तते।

<u>महिलाक्रिकेट्-</u>

अद्य अहमदाबादनगरे भारतीय महिलाक्रिकेट्दलं तिसृणां एकदिवसीय क्रिकेट् क्रीडाश्रृङ्खलायाः द्वितीये द्वन्द्वे न्यूजीलैण्ड-दलं सम्मुखी करिष्यति। भारतीयसमयानुसारं क्रीडायाः आरम्भः अपराह्ने सार्धैक वादने भविष्यति।

<u>संस्कृत-साप्ताहिकी</u>

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः अद्य मध्याह्ने सार्धैक-वादने भविष्यति। भवन्तः सर्वे श्रोतुं प्रभवन्ति।

।।इति वार्ताः।।